A.C. Joshi Library
P.U. Chandigarh

MSS No. 177 Subject Philosophy

Name of MSS तर्कसंग्रह Tarkasangraha

Author अन्नभट्ट व्या०

Period Not Available Folios 6

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios – –

तर्क संग्रह

177

177 (231

Sans. MS. 181.4		
T 187		तर्कसंग्रह ॥ अन्नंभट्ट व्या०
177-MS.		७ पत्रक ॥ ले० न० ११ पं० प्र० पृ०
		ह० ले०

त॰ १ ॐ श्रीगुरवे नमः ॐ निधाय हृदि विश्वेशं विधाय गुरुवंदनं बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१॥
द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशका
लदिगात्ममनांसि नवैव रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्र
वत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः चतुर्विंशतिर्गुणाः उत्क्षेपणापक्षेपणाकुं
चनप्रसारणगमनानि पंचकर्माणि परमपरं चेति द्विविधं सामान्यं नित्यद्रव्यवृत्तयो विशेषास्त्वनंता
एव समवायस्त्वेक एव अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावो अत्यंताभावो अन्योन्याभावश्चे
ति गंधवती पृथिवी सा द्विविधा नित्यानित्या च नित्या परमाणुरूपा अनित्या कार्यरूपा सा पुनः
त्रिविधा शरीरेंद्रियविषयभेदात् शरीरमस्मदादीनां इंद्रियं गंधग्राहकं घ्राणं नासाग्रवर्ति विष
यो मृत्पाषाणादि शीतस्पर्शवत्य आपः ता द्विविधा नित्या अनित्याश्च नित्याः परमाणुरूपाः अ
नित्याः कार्यरूपाः पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीरं वरुणलोके इंद्रियं रसग्राहकं १
रसनं जिह्वाग्रवर्ति विषयः सरित्समुद्रादि उष्णस्पर्शवत्तेजः तच्च द्विविधं नित्यमनित्यं च ॥

सर्वमूर्त्तसंयोगित्वं विभुत्वं ७ परिछिन्नपरिमाणवत्वं मूर्त्तत्वं ॥७

नित्यं च नित्यं परमाणुरूपं अनित्यं कार्य्यरूपम् पुनस्त्रिविधं शरीरेंद्रियविषयभेदात् शरीरमा
दित्यलोके इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति विषयश्चतुर्विधः भौमदिव्योदर्य्याकरजभेदा
त् भौमं वह्न्यादिकं अविंधनं दिव्यं विद्युदादिः भुक्तस्य परिणामहेतुरौदर्य्यं आकरजं सुवर्णादिः॥
रूपरहितस्पर्शवान्वायुः स द्विविधः नित्योऽनित्यश्च नित्यः परमाणुरूपः अनित्यः कार्य्यरूपः पु
नस्त्रिविधः शरीरेंद्रियविषयभेदात् शरीरं वायुलोके इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरव
न र्त्ति विषयो वृक्षादिकंपहेतुः शरीरांतःसंचारी वायुः प्राणः स चैकोप्युपाधिभेदात् प्राणापा॥
नादिसंज्ञां लभते शब्दगुणमाकाशं तच्चैकं विभु नित्यं च अतीतादिव्यवहारहेतुः कालः स
चैको विभुर्नित्यश्च प्राच्यादिव्यवहारहेतुर्दिक् सा चैका नित्या विभ्वी च ज्ञानाधिकरणमात्मा स
द्विविधः परमात्मा जीवात्मा च तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवः प्रतिशरीरं भिन्नो॥
विभुर्नित्यश्च सुखाद्युपलब्धिसाधनमिंद्रियं मनः तच्च प्रत्यात्मनियतत्वादनंतमणुरूपं नित्यं च॥
अथ गुणाः॥ चक्षुर्मात्रग्राह्यो गुणो रूपं तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तवि

धं॥ पृथिवीजलतेजोवृत्ति॥ तत्र पृथिव्यां सप्तविधं॥ अभास्वरं शुक्लं जले भास्वरं शुक्लं तेजसि रसनग्रा
ह्यो गुणो रसः स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः पृथिवीजलवृत्तिः पृथिव्यां षड्विधः
जले मधुर एव॥ घ्राणग्राह्यो गुणो गंधः स द्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः॥ त्वगिंद्रियमात्रग्रा
ह्यो गुणः स्पर्शः॥ स च त्रिविधः शीतोष्णानुष्णाशीतभेदात् पृथिव्यप्तेजोवायुवृत्तिः॥ तत्र शीतो जले उष्णस्ते
जसि अनुष्णाशीतः पृथिवीवाय्वोः॥ रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यम्॥ अन्यत्रापाकजमनित्य च ५
मनित्यं च नित्यगते नित्यमनित्यगतमनित्यम्॥ एकादिव्यवहारहेतुः संख्या नवद्रव्यवृत्तिः॥ एकत्वा
नित्यमनित्यं च ५ दिपरार्द्धपर्यंता एकत्वं नित्यगते नित्यम्॥ अनित्यगतेऽनित्यं द्वित्वादिकं तु सर्वत्रानित्यमेव॥ मानव्य
वहारासाधारणकारणं परिमाणं॥ नवद्रव्यवृत्ति॥ तच्चतुर्विधं॥ अणु महद्दीर्घं ह्रस्वं चेति॥ पृथग्व्यवहा
रासाधारणकारणं पृथक्त्वम्॥ सर्वद्रव्यवृत्ति। संयुक्तव्यवहारहेतुः संयोगः सर्वद्रव्यवृत्तिः संयोगनाश
को गुणो विभागः नवद्रव्यवृत्तिः॥ परापरव्यवहारासाधारणकारणे परत्वापरत्वे ते द्विविधे दिक्कृते
कालकृते च दूरस्थे दिक्कृतं परत्वम्॥ सामीपस्थे दिक्कृतमपरत्वम्॥ ज्येष्ठे कालकृते परत्वे कनिष्ठेका

सकृतमपरत्वम्। आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्तिः स्यंदनासमवायिकारणं
द्रवत्वं पृथिव्यप्तेजोवृत्तिः तत् द्विविधं सांसिद्धिकं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथिवी
तेजसोः पृथिव्यां घृतादौ अग्निसंयोगजं द्रवत्वम्। तेजसि सुवर्णादौ। चूर्णादिपिंडीभावहेतुर्गुणः
स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः स द्विविधः ध्वन्यात्मको वर्णात्मक
श्चेति ध्वन्यात्मको भेर्यादौ वर्णात्मकः संस्कृतभाषारूपः सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं सा द्विविधा स्मृतिर
नुभवश्च॥ संस्कारजन्यं ज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभवः स द्विविधः यथार्थोऽयथार्थश्च॥ तद्वति
तत्प्रकारकानुभवो यथार्थः सैव प्रमेत्युच्यते तदभाववति तत्प्रकारकश्चायथार्थः यथार्थानुभव
श्चतुर्विधः॥ प्रत्यक्षानुमित्युपमितिशाब्दभेदात्॥ तत्करणमपि चतुर्विधं॥ प्रत्यक्षानुमानोपमान
शब्दभेदात्॥ व्यापारवदसाधारणं कारणं करणं अनन्यथासिद्धकार्यनियतपूर्ववृत्ति कारणं का
र्यं प्रागभावप्रतियोगी॥ तत्कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्॥ यत्समवेतं का
र्यमुत्पद्यते तत्समवायिकारणं यथा तंतवः पटस्य पटश्च स्वगतरूपादेः कार्येणकारणेन वा सह

शुद्धत्ववतिशु
क्तौशुक्तत्वप्र
रजताभाववति
शुक्तौरजतत्वप्र

५

कस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायिकारणं यथा तंतुसंयोगः पटस्य तंतुरूपं पटगतरूपस्य त-
दुभयभिन्नं कारणं निमित्तिकारणम् यथा तुरीवेमादिकं पटस्य तदेतत्त्रिविधिकारणमध्ये यदसाधारणं तदे-
व करणं तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षं इंद्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधं निर्विकल्पकं सविक-
ल्पकं च तत्र निष्प्रकारकं निर्विकल्पकं किंचिदिदमिति सप्रकारकं सविकल्पकं यथा डित्थोयं ब्राह्मणोयं
श्यामोयमिति। तत्र प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः षड्विधः। संयोगः संयुक्तसमवायः। संयुक्तस-
मवेतसमवायः। समवायः। समवेतसमवायः। विशेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षजन-
ने संयोगः सन्निकर्षः घटरूपप्रत्यक्षजनने संयुक्तसमवायसन्निकर्षः चक्षुःसंयुक्ते घटे रूपस्य सम-
रूपात्व वायात् रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षः चक्षुसंयुक्ते घटे रूपं समवेतं तत्र रू-
पत्वस्य समवायात्। श्रोत्रेण शब्दसाक्षात्कारे समवायसन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वा-
त् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात्। शब्दत्वसाक्षात्कारे समवेतसमवायस-
न्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्। अभावप्रत्यक्षे विशेषणविशेष्यभा-

वः सन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् एवं सन्निक
र्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिंद्रियं तस्मादिंद्रियं प्रत्यक्षप्रमाणमिति सिद्धं । अनुमितिकरणमनु
मानं । परामर्शजन्यं ज्ञानमनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः यथा वह्निव्याप्यधूमवा
नयं पर्वत इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः । यत्र धूमस्तत्राग्निरिति
साहचर्यनियमो व्याप्तिः । व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता अनुमानं द्विविधं स्वार्थं परार्थं
च । स्वार्थं स्वानुमितिहेतुः । तथाहि स्वयमेव भूयोभूयो दर्शनेन यत्र धूमस्तत्राग्निरिति महानसा
तर्का ५ दौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र
धूमस्तत्राग्निरिति तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते । अयमेव लिंग
परामर्श इत्युच्यते । तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानं ॥
यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पंचावयववाक्यं प्रयुज्यते तत्परार्थानुमा
नं यथा पर्वतोग्निमान् धूमवत्वात् योयो धूमवान्सः सोग्निमान् यथा महानसः तथाचायं त

त॰स॰
८

स्मात्तथेति अनेन प्रतिपादिताल्लिंगात्परोप्यग्निं प्रतिपद्यते प्रतिज्ञाहेतूदाहरणोपनयनिगम-
नानि पंचावयवाः पर्वतोग्निमानिति प्रतिज्ञा धूमवत्वादिति हेतुः यो यो धूमवान् सः सोग्नि-
मान् यथा महानस इत्युदाहरणं तथा चायमित्युपनयः तस्मात्तथेति निगमनं स्वार्थानु-
मितिपरार्थानुमित्योर्लिंगपरामर्श एव करणं तस्माल्लिंगपरामर्शोनुमानं लिंगं त्रिविधं
अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति अन्वयेन व्यतिरेकेण च व्याप्ति-
मदन्वयव्यतिरेकि यथा वह्नौ साध्ये धूमवत्वं यत्र धूमस्तत्राग्निर्यथा महानस इत्यन्वयव्या-
प्तिः यत्र वह्निर्नास्ति तत्र धूमोपि नास्ति यथा महाह्रद इति व्यतिरेकव्याप्तिः अन्वयमा-
त्रव्याप्तिकं केवलान्वयि यथा घटोभिधेयः प्रमेयत्वात्पटादिवत् अत्र प्रमेयत्वाभिधेयत्व-
योर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वादभिधेयत्वाच्च व्यतिरेकमात्रव्याप्तिकं केवल-
व्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गंधवत्वात् यदितरेभ्यो न भिद्यते न तद्गंधवत्
यथा जलं न चेयं तथा तस्मान्न तथेति अत्र यत् गंधवत्तदितरेभ्योपि भिन्नमित्यन्वयदृष्टांतो

राम
८

नास्ति। पृथिवीमात्रस्यपक्षत्वात्॥ संदिग्धसाध्यवान्पक्षः यथाधूमवत्वेहेतौपर्वतः॥ निश्चि
तसाध्यवान्सपक्षः यथातत्रैवमहानसः॥ निश्चितसाध्याभाववान्विपक्षः॥ यथातत्रैवम
हाह्रदः॥ सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताःपंचहेत्वाभासाः॥ सव्यभिचारोनै
कांतिकः॥ सत्रिविधः॥ साधारणासाधारणानुपसंहारिभेदात्॥ तत्रसाध्याभाववद्वृत्तिः सा
प्रमेयत्वात्प धारणोनैकांतिकः॥ यथापर्वतोग्निमान्प्रमेयत्वस्यवह्न्यभाववतिह्रदेविद्यमानत्वात्॥ सर्वसप
क्षव्यावृत्तो॥ साधारणः यथाशब्दोनित्यः शब्दत्वादितिशब्दत्वंसर्वेभ्योनित्येभ्योव्यावृत्तं॥ शब्द
मात्रवृत्तिः॥ अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथासर्वमनित्यंप्रमेयत्वादिति
अत्रसर्वस्यापिपक्षत्वाद्दृष्टान्तोनास्ति। साध्याभावव्याप्तोहेतुर्विरुद्धः यथाशब्दोनित्यः कृ
तकत्वादितिकृतकत्वंहिनित्यत्वाभावेनानित्यत्वेनव्याप्तं॥ साध्याभावसाधकंहेत्वंतरं यस्य
ससत्प्रतिपक्षः यथाशब्दोनित्यः श्रावणत्वात्शब्दत्ववदिति। शब्दोनित्यःकार्यत्वात्घटव
दिति। असिद्धस्त्रिविधः॥ आश्रयासिद्धःस्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो

यथा गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवदिति । अत्र गगनारविंदमाश्रयः स च नास्त्येव
। स्वरूपासिद्धो यथा । शब्दो गुणः चाक्षुषत्वादिति अत्र चाक्षुषत्वं शब्दे नास्त्येव शब्दस्य श्रावणत्वा-
त् । सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधिः । साध्यस
मानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यव्यापकत्वं । साधननिष्ठात्यंताभावप्रतियो-
गित्वं साधनाव्यापकत्वं । पर्वतो धूमवान् वह्निमत्वादित्यत्र आर्द्रेंधनसंयोग उपाधिः । यत्र धूम
स्तत्र आर्द्रेंधनसंयोग इति साध्यव्यापकता यत्र वह्निस्तत्र आर्द्रेंधनसंयोग इति नास्ति अयोगो
लके आर्द्रेंधनसंयोगाभावात् इति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्या
पकत्वादार्द्रेंधनसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धं । यस्य साध्याभावः प्र
माणांतरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं तदभावः उष्ण
त्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वं व्याख्यातमनुमानं उपमितिकरणं उपमानं संज्ञासं
ज्ञिसंबंधज्ञानं उपमितिः तत्करणं सादृश्यज्ञानं तथाहि । कश्चिद्गवयशब्दवाच्यमजानन् क-

तश्चिदारण्यकपुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिंडं पश्यति त
दनन्तरं। असौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते। आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता।
वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदं। अस्मात्पदादयमर्थो बोद्धव्य इति ईश्वरसंकेतः श
क्तिः। आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावक
त्वमाकांक्षा। अर्थाबाधो योग्यता। पदानामविलंबेनोच्चारणं सन्निधिः। आकांक्षादिरहितं वाक्यमप्र
माणं। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणं आकांक्षाविरहात्। अग्निना सिंचेदिति न प्रमाणं योग्यता कां
विरहात्। प्रहरे प्रहरे असहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात्। वा
क्यं द्विविधं। वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणं। लौकिकं तु आप्तोक्तं
प्रमाणं। अन्यदप्रमाणं। वाक्यार्थज्ञानं शाब्दज्ञानं तत्करणं शब्दः। इति यथार्थानुभवो निरूपितः
। अयथार्थानुभवस्त्रिविधः। संशयविपर्ययतर्कभेदात्। एकस्मिन् धर्मिणि विरुद्धनानाधर्मवै
शिष्ट्यज्ञानं संशयः यथा स्थाणुर्वा पुरुषो वेति। मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमि

त०स०
६

त्ति। व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात् तर्हि धूमोपि न स्यादिति। स्मृतिरपि द्विवि-
धा यथार्था अयथार्था च। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था। सर्वेषामनुकूलवेदनीयं सु-
खं। प्रतिकूलवेदनीयं दुःखं। इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः। विहितकर्मजन्यो धर्मः। नि-
षिद्धकर्मजन्यस्त्वधर्मः। बुद्ध्यादयोष्टावात्ममात्रगुणाः बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या
ईश्वरस्य। अनित्या जीवस्य। संस्कारस्त्रिविधः वेगो भावना स्थितिस्थापकश्चेति। वेगः पृथिव्या-
दिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथाकृतस्य धनु-
रादेः पुनस्तदवस्थापादकः स्थितिस्थापकः। कटादिपृथिवीवृत्तिः। इति गुणाः। चलनात्मकं कर्म। ऊ-
र्ध्वदेशसंयोगहेतुरुत्क्षेपणं। अधोदेशसंयोगहेतुरपक्षेपणं। शरीरसन्निकृष्टसंयोगहेतुराकुंच-
नं। विप्रकृष्टसंयोगहेतुः प्रसारणं। अन्यत्सर्वं गमनं। पृथिव्यादिचतुष्टयमनोमात्रवृत्तिकर्म-
नित्यमेकमनेकानुगतं सामान्यं। द्रव्यगुणकर्मवृत्तिः तत् द्विविधं परं सत्ता अपरं जाति द्रव्यत्वा-
दिः। नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। नित्यसंबंधः समवायः। अयुतसिद्धवृत्तिः। ययोः द्व

शेषा।

राम०
६

योर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ यथा अवयवावयविनौ गुणगुणि
नौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अनादिः सांतः प्रागभावः उत्प
त्तेः पूर्वं कार्यस्य। सादिरनंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य। त्रैकालिकः संसर्गावच्छि
न्नप्रतियोगिताकोऽत्यंताभावः यथा भूतले घटो नास्तीति। तादात्म्यसंबंधावच्छिन्नप्र
तियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति। इति सर्वेषां पदार्थानां यथायथ
मुक्तेष्वंतर्भावात्सप्तैव पदार्था इति सिद्धं। कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये
अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः॥ इति तर्कसंग्रहः समाप्तः। शुभमस्तु॥

रामायनमः

लक्ष्यैकदेशावृत्तित्वमव्याप्तिः॥ यथा गोः कपिलत्वं॥ अलक्ष्यवृत्तित्वमतिव्याप्तिः। यथा गोः शृंगित्वं। लक्ष्यमात्रावर्त्तन
मसंभवः॥ यथा गोः एकशफत्वं॥ एतद्दूषणत्रयरहितो धर्मो लक्षणम्